© 2019 IJSRST | Volume 6 | Issue 5 | Print ISSN: 2395-6011 | Online ISSN: 2395-602X
Themed Section: Science and Technology
DOI : https://doi.org/10.32628/IJSRST

# मेघदूत गीतिकाव्ये दाम्पत्यजीवन विविध चित्रम्

**सोनिया**
शोध छात्रा, संस्कृत विभाग
सनातन धर्म महाविद्यालय
मुजफ्फरनगर (उ०प्र०)

महाकवि कालिदासः संस्कृत वाङ्मये अति प्रसिद्धं भासुरं रत्नम्। संस्कृत साहित्ये कालिदासीय ग्रन्थेषु मेघदूतम् इति विप्रलम्भश्रृंगार प्रधानं गीतिकाव्यम् अस्ति। संस्कृत भाषोपनिषद्धेषु ईदृशस्य काव्यस्य खण्डकाव्यम् च संदेशकाव्यम् इति प्रसिद्धिः। आधुनिक समये गीतिकाव्यम् इदम् उच्यते यतोस्मिन् काव्ये मानव मनसः मनोगतानाम् भावानाम् एवं भ्पसृवम् अनूभूयते। अत्र कुबेरशापेन अस्तङ्गमित महिम्नः कस्यचित। कर्त्तव्य विमुखस्य यक्षस्य विरह व्यथा वर्णनं कृतम्। वैदर्मीरीतिः अर्थान्तरन्यास चमत्कारः, मन्दाक्रान्ता छन्दः, प्रकते मानवीकरणम, उपमाया आस्वादनम्, अलकाया लोकोत्तर वर्णनं, विरहिण्या यक्षिव्या वर्णन, यक्षस्य संदेश इत्यदिनां विविध वर्णनं अस्य ग्रन्थरुप वैशिष्टयानि।

अस्य गीतिकाव्यरुप भाषा अतीव प्राञ्जल, सुमधुरा, प्रसादगुणान्विता च। कल्पना चरमणीया, अद्वितीया, अभिनवा, कोमला वर्ण्यविषयानुकूला च। प्रबन्धेऽस्मिन् एक नारीव्रतस्य यक्षस्य पतिव्रताया यक्षवध्वा विस्तरेण वर्णन कुर्वता। कालिदासेन दम्पत्योः प्रेम प्रति महती निष्ठा यथा प्रकृतीकृता तथा उपस्थापयितुम इष्यते। यक्षयक्षवध्वोः दाम्पत्य प्रेम्णो वर्णनमस्मिन गीतिकाव्ये कविता निपुणतया कृतम्। रामगियीश्रमे स्वितो यक्षः स्वकीयां भार्यां प्रति मेध माध्यमेन संदेश प्रेषयति। अत् भार्याविरहे यक्षा दौ बल्येन अभवत्।

**"कनक वलय भ्रंशरिक्त प्रकोष्ठः" (पूर्वमेघ 2)**

यदयपि स कामी तु अस्ति, किन्तु तस्य कामोऽपि नापरां कामपि सुन्दरीम् अपि तु स्वकीय भार्यामेव विषयी करोति। दाम्पत्य प्रेम्ण एकाग्रत्वम् एकनिष्ठत्वं चेत्थम् अत् प्रति पाद्यते। स आषाढमासे मेघ दृष्टवा भार्वायाः कृते व्यग्रो भवति।

कवि कालिदासः यक्षस्य विरहावस्यां वर्णयन् कवि कथयति–

**"मेधालोके भवति सुजिनौऽप्यन्याथावृत्ति चेतः।**

**कष्ठाश्लेषप्रणयिनि जने किं पुनर्दूरसंस्थे।।" (पूर्वमेघ–2)**

यक्षयक्ष वध्वोः दाम्पत्यप्रेम्णि उत्कण्ठायाः त्यागगस्य तथा च एकात्मभावस्य एव प्राधन्य विध्यते। यद्यपि यक्षवधुः विरहेण कृशतरा सञ्जाता, तथापि सा स्वप्रियतमस्य मंङ्ग्लार्थ देवान् पूजयति।

**आलोके ते निपताति पुरा सा बलिव्याकूला वा (उ०मे० 22)**

अन्ये अपि स्थाने यक्षे स्व दयितां जीविता लम्बनार्थी हेतवः मेघ समझे स्वकुशलमयी प्रेषितवान्प्रत्यासन्ने नभसि दयिता जीविता लम्पनार्थी जीमूतेन स्वकुशलमयी हारयिष्यन्तवृतिम्। सप्रत्यगैः कुटजकुसुमैः कल्पिताधीय तस्यै प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार।

सा विरहिणी प्रियतमस्य प्रत्यागमनपेक्षमाणा आशाबन्धमवलम्बस्य कश्चिद् दिवसान् यापयेद् इत्यातोऽयं विरही यक्षो मेघं कथयति।

तां चावश्यं दिवस गणनातत्परामेक पत्नी–मण्यापत्नामविध्वगतिर्दक्ष्यसि भ्रातृजायाम्। आशाबन्धः कुसुमसदृशं प्रायशोयङ्ग्नानाम् सदयः पाति प्रणयिह्वदयं विप्रयोगे रूणद्धि। (पूर्वमेघ)

पतिविरह सा केन प्रकारेण रजनीं यापयति इति यक्षुमुखात् ज्ञायते–

**नीता रात्रि क्षण इव मया सार्धमिच्छारतैर्या तामेवोष्णैर्विरहमहतीमश्रुभिर्यापयन्तीम्। (उ०मे० 26)**

तस्या दुःखं दृष्टवा निर्जीवः मेघ अपि रोदनं करिष्यन्ति–

**त्वामप्यस्त्रं नवजलमयं मोचयिष्यलवश्चम्। (उ०मे० 30)**

विरही यक्षः तुषाराद्रिवातान आलिङ्ग्ति यतो हि प्रियतमां संस्पृश्य ते आगता इति विचिन्तय–

**आलिङ्ग्यन्ते गुणवति मया ते तुषाराद्रिवार्ताः।**

**पूर्वं स्पृष्टं यदि किल भवेदङ्ग्मेभिस्तवेति।। (उ०मे० 44)**

दामपत्यजीवने संयोगश्च वियोग सर्वसमये उपस्थिता। संयोग समये सर्वे वस्तुनः सुखकारी भवति।

काव्यप्रकाशकारः नवम् उल्लासे अनुप्रासउदाहरणे अस्य श्लोक प्रस्तुत कुर्वन्ति। अस्स संयोग, वियोग दशा सम्यक् वर्णनं प्रस्तुतं करोति।

**यस्च च सविधे दयिता दवदहन स्तुहिन दीधि तिस्तस्य।**

**यस्य न सविधे दयिता दवदहन स्तुहिन दीधितिस्तस्य।।**

अन्ये अपि स्थाने स्वमं कालिदासेन अभिज्ञानेन शाकुन्तलम नाटकमध्ये विप्रयोग समये नायिका दशा कस्य प्रकारेण भवति वर्णनं करोति।

**अर्न्तहिते शशिनि सैव कुमुद्वती मे दृष्टिं व नन्दयति संस्मरणीय शोभा।**

**इष्टप्रवास जनीतान्यबला जनस्य दुखानि नूनमति मात्र सुदुःख सहानि (4/3)**

मेघदूते काव्ये कालिदास्य कथ्यते मानवः वियोग समये व्यवहारशून्य व भवति तेन कारणेन सः चेतन साध्यमर्थ कथमचेतेनेन कारयितुं प्रवृत इत्येपेक्षायां कवि समधते–

**धूमज्योति सविलमरुतां संनिपाताः क्व मेघः संदेशार्थाः क्व पटुकरणै प्राणिभिः प्रापणीयाः।**

**इत्यौत्सुक्यादपरिगणयन्गुहयकस्तं ययाचे कार्मार्त्ता हिं प्रकृतिकृपाणश्चेत नचितनेषु।।**

यक्षिणी गुणवति तथा च कल्याणी आसीत्। सा पत्युः कल्याणाम् एव इच्छति। एवमेव यक्षस्व ह्रदयेऽपि स्वकीया भार्यायाः कृते प्रेमातिशयो दृश्यते। प्रथमतो यौवनस्य आवेगरन्तं कर्तव्यच्युतभकरोत्। परन्तु वर्षभोग्य विरहरूपेण प्रायश्चितेन विशोधितः सः अन्तः किमपि परिवृतिं गतः। विरहावस्था एव निकषस्वरुपा यसा परीक्षितः प्रेमिको दाम्पत्यप्रेम्णः पराकाष्ठां प्राप्तोति। यथा कुमारसम्भवे महाकाव्ये, शाकुन्तले नाटके तथा मेघदूतेऽपि एतदेव तत्वं कविना प्रकाशितम्। अत एव सम्भोगाकाक्षा अपि विप्रलम्भगतां वेदनों प्रति अङ्ग्भावमासेवते इति तस्या वस्तुभूताया अपि गौणत्वमेव सूचितम्।

यक्षवधूः यक्षस्य द्वितीयं जीवितमस्ति। पतिविरहे सा चक्रवाकविरहे चक्रबाकीव जीवनं याययति।

**तां जानीथाः परिमितकथा जीवितं मे द्वितीयं**

**दूरीभूते मयि सहचरे चक्रवाकीमिवैकाम्।। (उ०मे० 20)**

भार्याप्रोर्म्ण व्यग्रोः यक्षः प्रथमं भार्यायाः कुशलमेव ज्ञातुमिच्छति–

**अव्यापन्नः कुशलमबले पृच्छति त्वां वियुक्त**

**पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेवः।। (उ०मे० 38)**

प्रकृत्यां भार्यायाः सादृश्यमप्राप्य सः पक्षः शिलायां धातु रागैः भायीयाः प्रणयकुपितामाकृतिं रचयति। किन्तु तथा कुर्वतः अपि तस्य नेत्रयोः अश्रुप्रवाहो निरसरति। येन स आलेख्यहारेणापि प्रियया सह मेलनं प्रातुमसमर्थो भवति। सस्वपनेऽपि भार्पालिङ्गनकामनया स्वबाहू प्रसारयति। भर्याया कृते तस्य दुःखातिश्यं, व्यग्रतां च पश्यन्त्यो वनदेव्यः अपि रुदन्ति। यक्षो भार्याधमेव जीवति, तथा च प्रियामपि धैर्य धारणाय उपदिश्यति।

**नन्वात्मानं बहु विगणयन्नात्मवैवालम्बे तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वम्।**

**कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेणा।**

**(उ०मे० 46)**

दामपत्य जीवने पुत्रमहिमा महत्त्वस्य महाकवि भवभूतिप्रणीत उत्तरामचरिते कथयते–

प्रसवः खलु प्रकर्ष पर्यन्तः सेहस्य। परं चैतदन्योन्य संश्लेषणं पित्रोः।

**अन्तःकरण तत्त्वस्य दम्पत्योः सेहसंश्रयात् आनन्दग्रंथिरेकोऽयम पत्यमिति पठ्यते।**

**उत्तररामचरित (3/7)**

मानवजीवने स्तीश्च पुरुषः सम्पूरक रुपेण भवति। तेषाम् मध्ये कश्चिद् विभाजकरेखाः सम्भव न अस्ति। मालतीमाधव नाटके दामपत्यप्रेमस्य इति रुपेण परिभाषितः अस्ति–

**प्रेयो मित्रं बन्धुता वा समग्रा, सर्वे कामाः शेवधिर्जीवितं वा।**
**स्त्रीणां भर्ता धर्मदाराश्च पुंसमित्यन्योन्य वत्सयोज्ञतिमरन्तु।।**

**(मालती माधव, 6/18)**

भवभूतिः उत्तरामचरिते दामपत्यजीवनस्य विशद वर्णनं अस्ति। येषां राम–सीतायोः आदर्श दाम्पत्यप्रेमस्य प्रतीक रुपेण प्रदर्शितम्–

**व्यतिषजति पदार्थानान्तरः कोऽपि हेतुर्न खलु बहिरूपाधीन्प्रीतयः संश्रयन्ते।**
**विकसित हि पतङ्ग्स्योदये पूण्डरीकं, द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः।**

**(उ०म० 6/12)**

दामपत्य जीवने पत्नयाः महत्त्वं वर्तते कथयते–

**इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो। रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।**
**अयं बाहु कष्ठो शिशिरमसृणो मोक्तिकसरः किमस्या न प्रेयो यदि परमसह्रस्तु विरहः।**

**(उत्तररामचरित 1/38)**

राम च सीतायोः दाम्पत्य–भावः आदर्शरुपेण सम्पूर्ण नारके परिलक्ष्यति। यथा–

**त्वं जीवितं त्वमाति मे ह्रदयं द्वितीयं त्वं कौमुदी नयनयोरमृंत त्वमङ्ग्। (3/31)**

अत दम्पती परस्पर विरहितौ जीवनावलम्बनर हिताविव वर्तेते। उभयोः कृते परस्परं कुशलस्य अभिज्ञानावश्यकं वर्तते। दाम्पत्यस्य इयमेव साधना, प्रेम्णः अयमेव सर्वोत्कृषटः अभिलाषः यत प्रियः सकुशलः तिष्ठतु। एतदतिरिच्य मेघदूतकाव्य विश्लेषणाद् दाम्पत्यस्य स्वाभाविकं धर्मद्वयं प्रतीयते।

प्रकृतं दाम्पत्यं न कर्त्तव्यानन्तरं प्रणयिन औदासीन्यं स्यात्। गाढप्रणयेनापि जनेन स्वाधिकार प्रयन्तेन न भवितण्यम्। तेन खलु यक्षः कुबेरशापादस्तगमित महिमा सञ्जातः।

दाम्पत्यस्य स्वभावोऽयं यत् सम्भोगापेक्षतया विप्रलम्भेन एव प्रेम्णः परिपाकः। सम्भोग श्रृंगारः कालिदासेन नोपेक्षितः। अत एव यक्षस्य कामवास्यायाः वर्णनमपि तेन सविस्तारं विहितम्। परन्तु विप्रलम्भेवहारेण सम्भोगस्य प्रगाढतरे स्थायिनि प्रेम्णि उत्तरणमेव दाम्पत्यमहिम्नो लक्षणम्।

## परिशीलित ग्रन्थ सूची


1. कालिदासः, मेघदूतम् सम्पादक– तरणीश झाः रामनारायण लाल विजय कुमार, इलाहाबाद।
2. कालिदास मेघदूत सम्पादक– रामतेज पाण्डेय।
3. भवभूति, उत्तरराम चरित, कपिलदेव द्विवेदी, रामनारायण लाल विजय कुमार, इलाहाबाद।
4. अभिज्ञान शाकुन्तलम्, कपिलदेव द्विवेदी, सम्पादक– प्रकाशन– रामनारायण लाल, विजय कुमार, इलाहाबाद।
5. काव्य प्रकाश, सम्पादक– श्रीनिवास शास्त्री, प्रकाशन– साहित्य भण्डार, मेरठ।
6. महावीर चरित, भवभूति।